श्रीरस्तु

श्रीरङ्गदिव्यदंपतिभ्यां नमः

श्रीमते रामानुजाय नमः

# सूक्तानि-तैत्तिरीयोपनिषच्च

## (शीक्षावल्ली-आनन्दवल्ली-भृगुवल्ल्यः)



श्रीरंगम श्रीफलाहारी जीयर स्वामी मठस्थ

पण्डित श्री नि. खगेन्द्राचार्येण संपादितम् ।

श्रीमदुभयवेदान्ताचार्यपीठप्रचाराय

भक्ताग्रेसरेण श्रीगजाधरसोमानिना श्रीमन्नारायणाय समर्पितम् ।

इन्द्रप्रस्थ अ. भा. वेदविद्वत्संमेलनसमये प्रकाशितम् ।

षष्ठावृत्तिः-५०००

शठकोपाब्द-५०७४]   ४—४—७१   [विक्रमाब्द-२०२९

## ॥ विषयसूची ॥


| | | |
|---|---|---|
| १ | पुरुषसूक्त, श्रीसूक्त मन्त्रक्रमेण पूजा एवं न्यास | |
| २ | स्वस्तिवाचनम् | १ |
| ३ | पुरुषसूक्तम् (शुक्ल-यजुर्वेद) | ४ |
| ४ | ,, (कृष्णयजुर्वेद) | ७ |
| ५ | नारायणानुवाकः | १२ |
| ६ | विष्णुसूक्तम् | १४ |
| ७ | श्रीसूक्तम् | १७ |
| ८ | भूसूक्तम् | २१ |
| ९ | नीलासूक्तम् | २३ |
| १० | शान्तिपञ्चकम् | ,, |
| ११ | नारायणोपनिषत् | २६ |
| १२ | तैत्तिरीयोपनिषत् (शीक्षावल्ली) | २९ |
| १३ | ,, (ब्रह्मानन्दवल्ली) | ४० |
| १४ | ,, (भृगुवल्ली) | ४९ |
| १५ | मन्त्रपुष्पं | ५६ |
| १६ | संक्षिप्तपुण्याहवाचनम् | |



प्राप्तिस्थानम् :—

१. श्री वेङ्कटेश देवस्थानम्,
फणसवाडी ८० / ८४ बम्बई—२.

२. नारायणवाडी ट्रस्ट, खाडिलकर रोड, बम्बई-४.

३. श्रीरङ्गमन्दिर कोठी, पो० वृन्दावन (जि० मथुरा)

४. श्री सत्यनारायण मन्दिर, मोलासर (राजस्थान)

श्रीवाणीविलासमुद्रणालयः, श्रीरङ्गम् ।

श्रीरस्तु

SRI GNANANANDA NIKETAN,
LIBRARY,
THAPOVANAM P.O.
Pin-605756.

श्रीरङ्गदिव्यदंपतिभ्यां नमः

# सूक्तानि-तैत्तिरीयोपनिषच्च

(शीक्षावल्ली-आनन्दवल्ली-भृगुवल्ल्यः)



SRI GNANANANDA NIKETAN,
LIBRARY,
THAPOVANAM P.O.
Pin-605756.

श्रीरंगम् श्रीफलाहारी जीयर स्वामी मठस्थ

पण्डित श्री नि. खगेन्द्राचार्येण संपादितम्

श्रीमदुभयवेदान्ताचार्यपीठप्रचाराय

भक्ताग्रेसरेण श्रीगजाधरसोमानिना श्रीमन्नारायणाय समर्पितम् ।

षष्ठावृत्तिः—५०००

शठकोपाब्द-५०७४] [विक्रमाब्द-२०२९

श्रीहरिः

## पुरुषसूक्त, श्रीसूक्त मन्त्रक्रमेण पूजा एवं न्यास

| | पुरुषसूक्त | श्रीसूक्त | षोडशोपचार | न्यास |
|---|---|---|---|---|
| १ | सहस्रशीर्षा | हिरण्यवर्णां | आवाहनम् | इति वामकरे |
| २ | पुरुष एवेद | ताम्म आवह | आसनम् | ,, दक्षिणकरे |
| ३ | एतावानस्य | अश्वपूर्वां | हस्तयोः अर्घ्यं | ,, वामपादे |
| ४ | त्रिपादूर्ध्व | कां सोऽस्मि | पादयोः पाद्यम् | ,, दक्षिणपादे |
| ५ | ततो विराड | चन्द्रां प्रभासां | आचमनीयम् | ,, वामजानौ |
| ६ | तस्माद्यज्ञात् सं | आदित्यवर्णे | स्नानम् | ,, दक्षिणजानौ |
| ७ | तस्माद्यज्ञात् | उपैतु मां | वस्त्रम् | ,, वामकट्यां |
| | ऋचः | | ऊर्ध्वपुण्ड्र | ,, मुखे |
| ८ | तस्मादश्वा | क्षुत्पिपासा | यज्ञोपवीतम् | ,, दक्षिणकट्यां |
| ९ | तं यज्ञं बर्हिषि | गन्धद्वारां | गन्धम् | ,, नाभौ |
| १० | यत्पुरुषं | मनसः | पुष्पम् | ,, हृदये |
| ११ | ब्राह्मणो | कर्दमेन | धूपम् | ,, वामकुक्षौ |
| १२ | चन्द्रमा मनसो | आपः सृजन्तु | दीपम् | ,, दक्षिणकुक्षौ |
| १३ | नाभ्या | आर्द्रां पु | नैवेद्यम् | ,, कण्ठे |
| १४ | यत्पुरुषेण | आर्द्रां यः | ताम्बूलम् | ,, मुखे |
| १५ | सप्तास्यासन् | ताम्म आवह | कर्पूर आरति | ,, शिरसि |
| | | | | शिखायै व |
| १६ | यज्ञेन यज्ञ | यः शुचिः | पुष्पाञ्जलिः | ,, अस्त्राय फट् |

॥ श्रीः ॥

॥ श्रीवेदपुरुषाय नमः ॥

# अथ स्वस्तिवाचनम् ॥

ओ३म् आनो भद्द्राः क्क्रतवो यन्न्तु व्विश्श्वतो दब्धासोऽअपरीतासऽउद्भिदः । देवानो यथा सदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवे-दिवे ॥१॥ देवानां भद्द्रासुमतिर्ऋजूयतान्देवाना-ᳬं रातिरभिनो निवर्त्तताम् । देवानाᳬं सक्ख्य-मुपसेदिमाव्वयन्देवानऽआयुः प्प्रतिरन्न्तु जीवसे ॥ २ ॥ तान्न्पूर्व्वया निविदाहूमहे व्वयम्भगम्मित्त्रमदितिन्न्दक्षमस्त्रिधम् । अर्य्यमणं व्वरुणᳬं सोममश्विना सरस्वतीनः सुभगामयस्करत् ॥ ३ ॥ तन्नोव्वातो मयोभुव्वातु भेषजन्तन्न्माता पृथिवी तत्त्पिता द्यौः । तद्ग्रावाणः

सोमसुतोमयोभुवस्त दश्विना शृणुतन्धिषण्या युवम् ॥ ४ ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभं य्यवानो व्विदथेषु जग्मयः । अग्निजिह्वामनवः सूरचक्षसो व्विश्वे नो देवाऽअवसागमन्निह ॥ ७ ॥ भद्रं कर्णेभिः शृणुयाम देवाभद्रं पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं य्यदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्ति देवा यत्त्रानश्चक्का जरसन्तनूनाम् । पुत्त्रासो यत्त्रपितरोभवन्ति-

मानोमुद्ध्यारीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता सपुत्रः । विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ १० ॥ तंपत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । नाकङ्गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधिरोचने दिवः ॥११॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शांतिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः । सर्वꣳशान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥ १२ ॥

ओं यतोयतः समीहसे ततोनोऽअभयं कुरु । शन्नः कुरुप्रजाभ्योभयन्नः पशुभ्यः ॥ १३ ॥ हरिः ओम् ॥

॥ श्रीहयग्रीवाय नमः ॥

# अथ पुरुषसूक्तम् ॥

(शुक्ल यजुर्वेदम)

ओं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्व्वतस्पृत्त्वात्यतिष्ठद्दशांगुलम् ॥ १ ॥
पुरुषऽएवेदꣳ सर्व्वंय्यद्भूतंय्यच्च भाव्व्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्ज्यायाँश्च पूरुषः ।
पादोस्य व्विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥
त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो व्विष्वङ्व्व्यक्रामत्साशनानशनेऽअभि ॥
ततो व्विराडजायत व्विराजोऽअधिपूरुषः ।
स जातोऽअत्यरिच्च्यत पश्चाद्भूमिमथो पुरः ॥
तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ।
पशूँस्ताँश्चक्क्रेव्वायव्व्यानारण्ण्याग्ग्राम्याश्च ये ॥

॥ ६ ॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाऽअजायन्त येके चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥ तंयज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः । तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखङ्किमस्यासीत्किम्बाहू किमूरू पादाऽउच्येते ॥ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरूतदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोऽअजायत ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्चच्च मुखादग्निरजायत ॥ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन् ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

॥ द्वितीयोऽनुवाकः ॥

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ वेदाहमेतं पुरुषं महान्तमादित्यवर्ण्णन्तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते । तस्य

योनिं परिपश्यन्ति धीरास्तस्मिन्न्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥ यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२ ॥ (शुक्ल-यजुर्वेद-२)

॥ श्रीः ॥

## अथ पुरुषसूक्तम् ॥

(कृष्णयजुर्वेदे)

[ शान्तिमन्त्रः ]

ॐ ॥ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शंनो

अस्तु द्विपदे । शं चतुष्पदे । ओं शान्ति-श्शान्ति श्शान्तिः ॥

सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशांगुलम् । पुरुष एवेदँ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायाँश्च पूरुषः ॥ १ ॥ पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातोऽत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ २ ॥ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्मइध्मश्शरद्धविः । सप्तास्यासन्परिधयः ।

त्रिस्सप्तसमिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ॥ ३ ॥ तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः । सम्भृतं पृषदाज्यम् । पशूंस्तांश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ४ ॥ तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ ५ ॥ ऊरू तदस्य यद्वैश्यः । पद्भ्यां शूद्रो अजायत । चन्द्रमा मनसो जातः ।

चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च ।
प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् ।
शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिश-
श्श्रोत्रात् । तथा लोकाꣳअकल्पयन् ॥ ६ ॥
वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तम-
सस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः ।
नामानि कृत्वाऽभिवदन् यदास्ते । धाता
पुरस्ताद्यमुदाजहार । शक्रःप्रविद्वान्प्रदिशश्चतस्रः
तमेवं विद्वानमृत इह भवति । नान्यः पन्था
अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः ।
तानि धर्माणि प्रथमान्यासन् । ते ह नाकं
महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति
देवाः ॥

पुरुषः पुरोऽग्रतोऽजायत कुतोऽकल्प-
यन्नासन्दे च ॥ १ ॥ (ज्यायानधिपूरुषः । अन्यत्र
पुरुषः)

अद्भ्यस्सम्भूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते । ॥ १ ॥ तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे ॥ २ ॥ ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।

नक्षत्राणि रूपं । अश्विनौ व्यात्तम् । इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण ॥३॥

जायते वर्षा सप्त च ॥

तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्ति-र्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शान्ति-श्शान्तिश्शान्तिः ॥ हरिः ओं तत्सत् ॥

---

॥ श्रीमते नारायणाय नमः ॥

## अथ नारायणानुवाकः ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् ॥ १ ॥ विश्वतः परमन्नित्यं विश्वं नारायणं हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ २ ॥ पतिं विश्व-

स्यात्मेश्वरꣳशाश्वतं शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥ ३ ॥ नारायणपरो ज्योतिरात्मा नारायणः परः । नारायणपरं ब्रह्म तत्त्वं नारायणः परः ॥ ४ ॥ नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

अनन्तमव्ययं कविꣳसमुद्रेऽन्तं विश्वशम्भुवम् । पद्मकोशप्रतीकाशꣳहृदयं चाप्यधोमुखम् ॥ ६ ॥ अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ॥ सन्ततꣳशिराभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरꣳसूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् ॥ तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः । सोऽग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः ॥९॥

तिर्यगूर्ध्वमधः शायी रश्मयस्तस्य सन्तताः ।
सन्तापयति स्वं देहमापादतलमस्तकम् । तस्य
मध्ये वन्हिशिखा अणीयोर्ध्वा व्यवस्थिता ॥
नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा ॥ ११ ॥
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमस्वराट् ॥
ऋतं सत्यं परंब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥
ॐ नारायणाय विद्महे, वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

॥ श्रीविष्णवे नमः ॥

## अथ विष्णुसूक्तम् ॥

ओं विष्णोनुकं वीर्याणि प्रवोचं यः पार्थिवानि
विममेरजांसि ॥ यो अस्कभा यदुत्तरंसधस्थं

विचक्रमाणस्त्रेधोरुगायः ॥ १ ॥ ओं विष्णो
रराटमसि विष्णोः श्नप्त्रेस्थो ॥ विष्णोः स्यूरसि
विष्णो ध्रुवोसि वैष्णवमसि विष्णवे त्वा
॥ २ ॥ तदस्य प्रियमभि पाथो अश्यां नरो
यत्र देवयवो मदन्ति ॥ ऊरुक्रमस्य सहिबन्धु-
रित्था विष्णोः पदे परमे मध्व उत्सः ॥ ३ ॥
प्रतद्विष्णुस्तवते वीर्याय मृगो न भीमः कुचरो
गिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधि-
क्षियन्ति भुवनानि विश्वा ॥ ४ ॥ परो
मात्रया तनुवा वृधान नते महित्वमन्व-
श्नुवन्ति ॥ उभेते विद्म रजसी पृथिव्या
विष्णोर्देवत्वं परमस्य वित्से ॥ ५ ॥ विचक्रमे
पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ॥
ध्रुवासो अस्य कीरयो जनासः ऊरुक्षितिं
सुजनिमा चकार ॥ ६ ॥ त्रिर्देवः पृथिवीमेष

एतां विचक्रमे शतवर्चसं महित्वा ॥ प्रविष्णु-
रस्तु तवसस्तवीयान् त्वेषछंह्यस्य स्थविरस्य
नाम ॥ ७ ॥ अतो देवा अवन्तु नो यतो
विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥ ८ ॥
इदं विष्णुर्विचक्रमे, त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे ॥ ९ ॥ त्रीणि पदा विच-
क्रमे, विष्णुर्गोपा अदाभ्यः । अतो धर्माणि
धारयन् ॥ १० ॥ विष्णोः कर्माणि पश्यत
यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा
॥ ११ ॥ तद्विष्णोः परमं पदं, सदा पश्यन्ति
सूरयः । दिवीव चक्षुराततम् ॥ १२ ॥ तद्वि-
प्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत्परमं पदम् ॥ १३ ॥

---

॥ श्री श्रियै नमः ॥

# ॥ अथ श्रीसूक्तम् ॥

( ऋ०-४-४-३५ )

ओं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
ओं ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम्
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
ओं अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम् ॥ ३ ॥
ओं कां सोस्मितां हिरण्य प्राकारामार्द्रां
ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां
पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ओं चन्द्रां
प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टा-
मुदाराम् । तां पद्मिनीमीं शरणमहं प्रपद्ये
अऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥ ओं

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥ ओं उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ आपः सृजन्तु स्निग्धानि चिक्लीतवस मे गृहे । नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं
पुरुषानहम् ॥ १५ ॥ यः शुचिः प्रयतो भूत्वा
जुहुयादाज्यमन्वहम् । सूक्तं पञ्चदशर्चं च
श्रीकामः सततं जपेत् ॥ पद्मानने पद्मिनि
पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि । विश्व-
प्रिये विश्वमनोऽनुकूले त्वत्पादपद्मं मयि संनि-
धत्स्व ॥ पद्मानने पद्मऊरू पद्माक्षि पद्म-
संभवे । तन्मे भजसि पद्माक्षि येन सौख्यं
लभाम्यहम् ॥ अश्वदायी गोदायी धनदायी
महाधने । धनं मे जुषतां देवि सर्वान्कामांश्च

देहि मे ॥ पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम् । प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु मे ॥ २० ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् । सरसिजनिलय सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ २३ ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ २५ ॥ श्रीर्वर्चस्व-

मायुष्यमारोग्यमाविधाच्छोभमानं महीयते । धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

॥ श्रीभूदेव्यै नमः ॥

## अथ भूसूक्तम् ॥

ओं भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥ आऽयङ्गौः पृश्निरक्रमीदसदन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥ २ ॥ त्रिंशद्धाम विराजति वाक्पतंगाय शिश्रिये । प्रत्यस्य वहद्युभिः ॥ ३ ॥ अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिषः सुवः ॥ ४ ॥ यत्वा क्रुद्धः परोवपमन्युना यदवर्त्या । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥ ५ ॥ यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा

वसंवश्च समाभरन् ॥ मोदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः ॥ ७ ॥ देवी हिरण्यगार्भिणी देवी प्रसूवरी सदने सत्यायने सीद ॥ ८ ॥ समुद्रवती सावित्री ह्नो देवी मत्यवी मही । धरणीमहोव्याधिष्ठा श्रृङ्गे श्रृङ्गे यज्ञे यज्ञे विभीषिणी ॥९॥ इन्द्रपत्नी व्याजनी सुरासित-इह वायुमती जलशयनी । श्रियंधाराजा सत्यन्तोपरि मेदिनी श्वोपरिधत्तङ्गाय ॥ २० ॥ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ॥ १२ ॥

ओं शान्तिः शान्तिः शान्तिः ॥

## अथ नीलासूक्तम् ॥

नीलां देवीगँ शरणमहं प्रपद्ये सुतरांसि तरसे नमः ॥ गृणाहि घृतवंतो सवितराधिपत्यः पयस्वती रन्तिराशानो अस्तु ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोतौ । बृहस्पतिर्मातरिश्वोन वायुस्सन्धुवाना वाता अभिनो गृणन्तु । विष्टम्भो दिवोधरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो नीला प्रचोदयात् ॥

इति नीलासूक्तम् ॥

---

## ॥ शान्तिपञ्चकम ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्य-मा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-

रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्मवदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ओं शान्तिः शान्तिः शान्तिः ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासꣳशिवामदस्ताञ्जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो

वाचमुद्यासँ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्ति-र्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥

ओं शान्तिः शान्तिः शान्तिः ॥

इति शान्तिपञ्चकम् ॥

---

## अथ नारायणोपनिषत् ॥

ओं अथ पुरुषो ह वै नारायणोऽकामयत, प्रजाः सृजेयेति । नारायणात्प्राणो जायते । मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद् ब्रह्मा जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते ।

नारायणात्प्रजापतिः प्रजायते नारायणादूद्वादशादित्या रुद्रा वसवः सर्वाणि छन्दाँसि नारायणादेव समुत्पद्यन्ते। नारायणात्प्रवर्तन्ते । नारायणे प्रलीयन्ते । एतदृग्वेदशिरोऽधीते ॥ १ ॥

अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः विदिशश्च नारायणः ऊर्ध्वश्च नारायणः । अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वं यद् भूतं यच्च भव्यम् । निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । य एवं वेद स विष्णुरेव भवति, स विष्णुरेव भवति । एतद्यजुर्वेदशिरोऽधीते ॥ २ ॥

'ओं' इत्यग्रे व्याहरेत् । 'नमः' इति पश्चात् । 'नारायणाय' इत्युपरिष्टात् । 'ओं' इत्येकाक्षरम् । 'नमः' इति द्वे अक्षरे । 'नारायणाय' इति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति अनपब्रुवः सर्वमायुरेति। विन्दते प्राजापत्यं, रायस्पोषङ्गौपत्यं ततोऽमृतत्वमश्नुते, ततोऽमृतत्वमश्नुते, ततोऽमृतत्वमश्नुत इति । एतत्सामवेदशिरोऽधीते ॥ ३ ॥

प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम् । अकार उकारो मकार इति । तानेकधा समभरत्तदेतदोमिति यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । 'ओं नमो नारायणाय' इति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति तदिदं पुण्डरीकं विज्ञानघनं तस्मात्तडिदाभमात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः । ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युत इति । सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्रह्मों एतदथर्वशिरोऽधीते ॥

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । सायं प्रातरधीयानः पापोऽपापो भवति । मध्यंदिनमादित्याभिमुखोऽधीयानः सद्यः पञ्चमहापातकोपपातकेभ्यः प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते नारायणसायुज्यमवाप्नोति । श्रीमन्नारायणसायुज्यमवाप्नोति । य एवं वेद । सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु माविद्विषावहै ओं शांतिः शांतिः शांतिः ॥

—:※:—

|| श्रीः ||

# || तैत्तिरीयोपनिषत् ||

## शीक्षावल्ली

|| श्रीगुरुभ्यो नमः हरिः ॐ ||

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ओं शान्तिः शान्तिः शान्तिः ||

सत्यं वदिष्यामि पंच च || अनु० १ ||

शीक्षां व्याँख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥ १ ॥ शीक्षां पंच ॥ अनु० २ ॥

सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातः सꣳहिताया उपनिषदं व्याँख्यास्यामः । पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् । ता महासꣳहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः सन्धिः ॥ १ ॥ वायुः सन्धानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः सन्धिः । वैद्युतः सन्धानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥ २ ॥ अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनꣳ सन्धानम् । इत्यधिविद्यम् ।

अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तर-
रूपम् । प्रजा सन्धिः । प्रजनन ँ सन्धानम् ।
इत्यधिप्रजम् ॥ ३ ॥ अथाध्यात्मम् । अधरा
हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्
सन्धिः । जिह्वा सन्धानम् । इत्यध्यात्मम् ।
इतीमा महासँहिताः । य एवमेता महासँ-
हिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिः ।
ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ४ ॥
सन्धिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन ॥ ३ ॥

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्यो-
ऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु ।
अमृतस्य देव धारणो भूयासम् । शरीरं मे विच-
र्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि-
विश्रुवम् । ब्रह्मणः कोशोऽसि मेधयापिहितः ॥

श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥ १ ॥
कुर्वाणाऽचीरमात्मनः । वासांसि मम गावश्च ।
अन्नपाने च सर्वदा । ततो मे श्रियमावह ।
लोमशां पशुभिः सह स्वाहा । आ मा यन्तु
ब्रह्मचारिणः स्वाहा । वि मा यन्तु ब्रह्मचारिणः
स्वाहा । प्र मा यन्तु ब्रह्मचारिणः स्वाहा ।
दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु
ब्रह्मचारिणः स्वाहा ॥ २ ॥ यशो जनेऽसानि
स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तं
त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश
स्वाहा । तस्मिन्सहस्रशाखे । नि भगाहं त्वयि
मृजे स्वाहा । यथाऽऽपः प्रवतायन्ति । यथा
मासा अहर्जरम् । एवं मां ब्रह्मचारिणः ।
धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा
भाहि प्र मा पद्यस्व ॥ ३ ॥ वितन्वाना शमा-

यन्तु ब्रह्मचारिणः स्वाहा धातरायन्तु सर्वतः स्वाहैकँ च ॥ ४ ॥

भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुवरित्यसौ लोकः ॥ १ ॥ मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतीँषि महीयन्ते । भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूँषि ॥ २ ॥ मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव

सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति ॥ ३ ॥ असौ लोको यजूꣳषि वेद द्वे च ॥

स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ ॥ १ ॥ सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मन आनन्दम् ।

शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्स्व ॥ २ ॥ वायावमृतमेकं च ॥ ६ ॥

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि। आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक्त्वक् । चर्म माꣳसꣳस्नावास्थि मज्जा । एतदधि विधाय ऋषिरवोचत् । पाङ्क्तं वा इदꣳसर्वम् । पाङ्क्तेनैव पाङ्क्तꣳस्पृणोतीति ॥१॥ सर्वमेकं च ॥७॥

ओमिति ब्रह्म । ओमितीदꣳसर्वम् । ओमित्येतदनुकृति ह स्म वा अप्योश्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओꣳशोमिति शस्त्राणि शꣳसन्ति। ओमित्यध्वर्युः प्रति-

गुरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ ॥ १ ॥ ओं दृर्श ॥ ८ ॥

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्याय-प्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्नि-होत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वा-ध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वा-ध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति

नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः ॥ १ ॥
प्रजा च स्वाध्यायप्रवचने च षट् च ॥ ९ ॥

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणँ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥ १ ॥ अहँ षट् ॥ १० ॥

वेदमनूच्याचार्यो ऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १ ॥ देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यन-

वद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २ ॥ नो इतराणि । ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ३ ॥ ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् ।

एवमुपासितव्यम् । एवमुचैतदुपास्यम् ॥ ४ ॥

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं तानि त्रयोपास्यानि स्यात्तेषु वर्तेरन् सप्त च ॥ ११ ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥ ओं शान्तिः शान्तिः शान्तिः ॥ १ ॥ सत्यमवादिषं पञ्च च ॥ १२ ॥

शं नः शीक्षां सह नौ यश्छन्दसां भूस्स यः पृथिव्योमित्यृतं चाहं वेदमनूच्य शंनो द्वादश ॥

इति तैत्तिरीयोपनिषदि शीक्षावल्ली ॥

॥ श्रीः ॥

## ब्रह्मानन्दवल्ली

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

ओं शान्तिः शान्तिः शान्तिः ॥

ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान्कामान् सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥१॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ २ ॥

प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च

ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुष-
मुच्यते। सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मो-
पासते। प्राणो हि भूतानामायुः। तस्मात्सर्वा-
युषमुच्यत इति। तस्यैष एव शारीर आत्मा।
यः पूर्वस्य। तस्माद्वा एतस्मात्प्राणमयात्। अन्यो-
न्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष
पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं
पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः
पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथ-
र्वाङ्गिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्मा-
द्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा
विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध

एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ४ ॥

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान् कामान् समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥

असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३। आहो विद्वानमुं लोकं प्रेत्य। कश्चित्समश्नुता३उ। सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इद॑ँ सर्वमसृजत। यदिदं किंच। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्। यदिदं किंच। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति ॥ ६ ॥

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानँ स्वयमकुरुत। तस्मात्तत्सुकृत-

मुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥ ७ ॥

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषाऽनन्दस्य मीमाꣳसा भवति । युवा स्यात्साधु युवाऽध्यायकः । आशिष्ठो द्रढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः ।

स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः । स एकः पितॄणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः । स एकः कर्मदेवानां देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः । स एक इन्द्रस्यानन्दः । श्रोत्रियस्य चाकामहत-

स्य । ते ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतं आनन्दमयमात्मानं उपसंक्रामति । तदप्येष श्लोको भवति ॥८॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतꣳह वाव न तपति । किमहꣳ साधु नाकरवम् ।

किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मान ँ स्पृणुते । उभे ह्येवैष एते आत्मान ँ स्पृणुते । य एवं वेद । इत्युपनिषत् ॥ ९ ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

ओं शान्तिः शान्तिः शान्तिः ॥

इति तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ली ॥

॥ श्रीः ॥

# भृगुवल्ली

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै।

ओं शान्तिः शान्तिः शान्तिः ॥

भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत् प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तꣳ होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति।

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳहोवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ २ ॥

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३ ॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि

भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ ४ ॥

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ ५ ॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्नवा-

नन्नादो भवति । महान् भवति प्रजया पशुभि-र्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ६ ॥

अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ७ ॥

अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो

भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ८ ॥

अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ९ ॥

न कञ्चन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्न ँ राद्धम्। मुखतोऽस्मा अन्न ँ राध्यते। एतद्वै मध्यतोऽन्न ँ राद्धम्। मध्यतोऽस्मा अन्न ँ राध्यते। एतद्वा अन्ततोऽन्न ँ राद्धम्।

अन्ततोऽस्मा अन्नꣳ राध्यते । य एवं वेद । क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्ति-रिति पायौ । इति मानुषीस्समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजाति-रमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे । तत् प्रतिष्ठेत्युपासीत । प्रतिष्ठावान् भवति । तन्मह इत्युपासीत । महान् भवति । तन्मन इत्युपा-सीत । मानवान् भवति । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृ-व्याः । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमय-

मात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसं-
क्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एत-
मानन्दमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्
कामान्नी कामरूप्यनुसंचरन् । एतत्साम गाय-
न्नास्ते । हा (३) वुहा (३) वुहा (३) वु । अहमन्न-
महमन्नमहमन्नम् । अहमन्नादो(२)ऽहमन्नादो-
ऽ(२)हमन्नादः । अहꣳश्लोककृदहꣳश्लोककृदह-
ꣳश्लोककृत् । अहमस्मि प्रथमजा ऋता (३) स्य ।
पूर्वं देवेभ्यो अमृतस्य ना (३) भाइ । यो मा
ददाति स इदेव मा (३) वाः । अहमन्नमन्नम-
दन्तमा (३)द्मि । अहं विश्वं भुवनमभ्यभवाम् ।
सुवर्न ज्योतीः । य एवं वेद । इत्युपनिषत् ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं
करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

ओं शान्तिः शान्तिः शान्तिः ॥

इति तैत्तिरीयोपनिषदि भृगुवल्ली ॥

## ॥ मन्त्रपुष्पम् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं वेद ॥ आयतनवान् भवति । आपो वा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति ॥ आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । असौ वै तपन्नपामायत-

नम् । आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद । आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् ॥ आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । चन्द्रमा वा अपामायतनम् । आयतनवान् भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति ॥ य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । नक्षत्राणि वा अपामायतनम् । आयतनवान् भवति । यो नक्षत्राणामायतनं वेद । आयतनवान् भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान् भवति । य एवं वेद ॥ योऽपामायतनं वेद । आयतनवान् भवति । पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वेद । आय-

तनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ॥ आयतनवान् भवति । संवथ्सरो वा अपामायतनम् । आयतनवान् भवति । यस्संवथ्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवथ्सरस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ इमे वै लोका अप्सु प्रतिष्ठिताः । तदेषाऽभ्यनूक्ता । अपाꣳरसमुदयꣳसन् । सूर्ये शुक्रꣳसमाभृतम् । अपाꣳरसस्य यो रसः । तं वो गृह्णाम्युत्तममिति । इमे वै लोका अपाꣳरसः । तेऽमुष्मिन्नादित्ये समाभृताः ॥

राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ।

SRI GNANANANDA NIKETAN
LIBRARY,
THAPOVANAM P. O.
Pin-605756.

ओँ तद्ब्रह्म । ओँ तद्वायुः । ओँ तदात्मा । ओँ तत्सत्यम् । ओँ तत्सर्वम् । ओँ तत्पुरोर्नमः । अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वꣳरुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपोज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥ तद्विष्णोः परमं पदं, सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥

नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ॥ वज्रनखाय विद्महे तीक्ष्णदꣳष्ट्राय धीमहि । तन्नो नारसिंहः प्रचोदयात् ॥

## ॥ संक्षिप्तपुण्याहवाचनम् ॥

हरिः ओं पुण्याहं, स्वस्ति, ऋद्धिमित्योंकारपूर्वं त्रिस्त्रिरेवं मा-
माशिषः वाचयेत् ( इति बोधायनः ) ॥

ओं पुनस्त्वादित्या रुद्रा वसवः समिन्धताम् । पुनर्ब्रह्माणो
वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्द्धयस्व । सत्याः सन्तु यज-
मानस्य कामाः ॥ भो ब्राह्मणा अस्य यजमानस्य पुण्याहं भवन्तो
ब्रुवन्तु, प्रतिवचनं, पुण्याहमस्तु ३ ।

ओं स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
भो ब्राह्मणा अस्य यजमानस्य स्वस्ति भवन्तो ब्रुवन्तु ।
प्रतिवचनं, स्वस्तिरस्तु ॥ ३ ॥

ओं ऋध्यामस्तोमं सनुयाम वाज । मानो मन्त्रं सरथेहोप-
यातम् ॥

यशो न पक्व मधुगोष्वन्तरा । भूतांशो अश्विनोः काममप्राः ॥
[ ऋक् ८-६-२ ]

भो ब्राह्मणा अस्य यजमानस्य ऋद्धिं भवन्तो ब्रुवन्तु ।
प्रतिवचनं, ऋद्धिरस्तु ॥ ३ ॥

आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायता माराष्ट्रे राजन्यः
शूरऽइषव्योतिव्याधि महारथो जायतान्दोग्ध्री धेनुर्वोढा
नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा सभेयो
युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः
पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योग क्षेमो
नः कल्पताम् ।